

श्री

गोपाल सहस्त्रनामस्तोत्र

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

संस्करण : नवंबर २०१९,संवत् २०७६

मूल्य :
सादा गुटका :३० रुपयेमात्र।
रेशमी जिल्द :५० रुपये मात्र।

Printers & Publishers
Khemraj Shrikrishnadass
Prop : Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg.
7 th Khetwadi, Mumbai 400 004
Tel / Fax : 91 22 23857456

Web Site : http://www.khe_shri.com
E-Mail khemraj@bharatmail.co.in

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadas
Prop : Shri Venkateshwar Press, Mumbai 400004
at their Shri Venkateshwar Press,
22, Chintamani Industrial Estate,Ramtekadi,Pune 411013

अथ

गोपालसहस्रनाम

प्रारभ्यते

राधाकृष्णाभ्यां नमः



फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं,
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥१॥

श्रीगणेशाय नमः

अथ
गोपालसहस्रनाम प्रारभ्यते

पार्वत्युवाच

कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ॥
ब्रह्माण्डाऽखिलनाथस्त्वं सृष्टिसंहारकारकः ॥१॥
त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः ॥
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥२॥

आश्चर्यमिदमत्यन्तं जायते मम शङ्कर ॥
तत्प्राणेश महाप्राज्ञ संशयं छिन्धि शङ्कर ॥३॥

श्रीमहादेव उवाच

धन्याऽसि कृतपुण्याऽसि पार्वति प्राणवल्लभे ॥
रहस्यातिरहस्यं च यत्पृच्छसि वरानने ॥४॥
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥५॥
दत्ते च सिद्धि हानिः स्यात्तस्माद्यत्नेन गोपयेत् ॥
इदं रहस्यं परमं पुरुषार्थप्रदायकम् ॥६॥

धनरत्नौघमाणिक्यतुरङ्गमगजादिकम् ॥
ददाति स्मरणादेव महामोक्षप्रदायकम् ॥७॥
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥
योऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्दनः ॥८॥
संसारसंगरोत्तारकारणाय सदा नृणाम् ॥
श्रीरंगादिकरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥९॥
ततो लोका महामूढा विष्णुभक्तिविवर्जिताः ॥
निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः ॥१०॥

निरञ्जनो निराकारो भक्तानां प्रीतिकामदः ॥
वृन्दावनविहाराय गोपालं रूपमुद्वहन् ॥११॥
मुरलीवादनाधारी राधायै प्रीतिमावहन् ॥
अंशांशेभ्यः सन्मुन्मील्य पूर्णरूपकलायुतः ॥१२॥
श्रीकृष्णचन्द्रो भगवान्नन्दगोपवरोद्यतः ॥
धरणीरूपिणी माता यशोदानन्ददायिनी ॥१३॥
द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः ॥
ब्रह्मणाऽभ्यर्थितो देवो देवैरपि सुरेश्वरि ॥१४॥

जातोऽवन्यां मुकुन्दोऽपि मुरलीवेदरेचिका ॥
तया सार्द्धं वचःकृत्वा ततो जातो महीतले ॥१५॥
संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम् ॥
एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम् ॥१६॥
गौरतेजो विना यस्तु श्यामतेजः समर्चयेत् ॥
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे ॥१७॥
स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः ॥
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि ॥१८॥

तस्माज्ज्योतिरभूद्द्वेधा राधामाधव-रूपकम् ।।
तस्मादिदं महादेवि गोपालेनैव भाषितम् ।।१९।।
दुर्वाससो मुनेर्मोहे कार्तिक्यां रासमण्डले ।।
ततः पृष्टवती राधा संदेहं भेदमात्मनः ।।२०।।
निरञ्जनात्समुत्पन्नं मयाधीतं जगन्मयि ।।
श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च ।।२१।।
ततो नारदतः सर्वं विरला वैष्णवास्तथा ।।
कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः ।।२२।।

शठाय कृपणार्थाय दांभिकाय सुरेश्वरि ॥
ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत् ॥२३॥
अस्य श्रीगोपालसहस्रनामस्तोत्रमहामन्त्रस्य श्रीनारदऋषिः ॥ अनुष्टुप् छन्दः ॥ श्रीगोपालो देवता॥ कामो बीजम् ॥ माया शक्तिः ॥ चन्द्रः कीलकम् ॥ श्रीकृष्णचन्द्रभक्तिरूपफलप्राप्तये श्रीगोपाल सहस्रनामजपे विनियोगः ॥ अथवा ॥ ॐ ऐं क्लीं बीजम् ॥ श्रीं ह्रीं शक्तिः ॥

श्रीवृन्दावननिवासः कीलकम् ॥ श्रीराधाप्रियं परं ब्रह्मेति मन्त्रः॥ धर्मादि चतुर्विधपुरुषार्थ सिद्ध्यर्थे जपे विनियोगः ॥ ॐ क्लां अंगुष्ठाभ्यां नमः ॥ ॐ क्लीं तर्जनीभ्यां नमः ॥ ॐ क्लूं मध्यमाभ्यां नमः ॥ ॐ क्लैं अनामिकाभ्यां नमः ॥ ॐ क्लौं कनिष्ठिकाभ्यां नमः ॥ ॐ क्लः करतलकरपृष्ठाभ्यां नमः ॥ ॐ क्लां हृदयाय नमः ॥ ॐ क्लीं शिरसे स्वाहा ॥ ॐ क्लूं शिखायै वषट् ॥ ॐ क्लैं

कवचाय हुम् ॥ ॐ क्लौं नेत्रत्रयाय वौषट् ॥
ॐ क्लः अस्त्राय फट् ॥ अथ ध्यानम् ॥
कस्तूरी तिलकं ललाटपटले वक्षस्थले कौस्तुभं,
नासाग्रे वरमौक्तिकं करतले वेणुं करे कङ्कणम् ॥
सर्वांगे हरिचंदनं सुललितं कण्ठे च मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥१॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ॥

गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥२॥
ॐक्लीं देवः कामदेवः कामबीजशिरोमणिः॥
श्रीगोपालो महीपालः सर्ववेदाङ्गपारगः॥१॥
धरणीपालको धन्यः पुंडरीकः सनातनः ॥
गोपति१० र्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः॥२॥
आदिकर्ता महाकर्ता महाकालः प्रतापवान् ॥
जगज्जीवो जगद्धाता२० जगद्भर्ता जगद्वसुः ॥३॥

मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् ॥
नारायणो हृषिकेशो गोविन्दो३० गरुडध्वजः ॥४॥
गोकुलेन्द्रो महाचन्द्रः शर्वरीप्रियकारकः ॥
कमला मुखलोलाक्षः पुण्डरीकशुभावहः ॥५॥
दुर्वासाः कपिलो भौमः सिन्धुसागरसङ्गमः४०॥
गोविन्दो गोपतिर्गोत्रः कालिन्दीप्रेमपूरकः ॥६॥
गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः ॥
नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः५०॥७॥

सर्वमङ्गलदाता च सर्वकामप्रदायकः ॥
आदिकर्ता महीभर्ता सर्वसागर सिन्धुजः ॥८॥
गजगामी गजोद्धारी कामी कामकलानिधिः ॥
कलङ्करहितश्चन्द्रो६० बिम्बास्यो बिम्बसत्तमः॥९॥
मालाकारः कृपाकारः कोकिलास्वरभूषणः ॥
रामो नीलाम्बरो देवो हली दुर्दममर्दनः७०॥१०॥
सहस्राक्षपुरीभेत्ता महामारीविनाशनः ॥
शिवः शिवतमो भेत्ता बलारातिप्रपूजकः ॥११॥

कुमारी वरदायी च वरेण्यो मीनकेतनः ॥
नरो८० नारायणो धीरो राधापतिरुदारधीः ॥१२॥
श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा ॥
वृन्दापतिः९० कुलग्रामी धामी ब्रह्मसनातनः ॥१३॥
रेवतीरमणो रामश्चञ्चलश्चारुलोचनः ॥
रामायणशरीरोऽयं रामी१०० रामः श्रियः पतिः॥१४॥
शर्वरः शर्वरी शर्वः सर्वत्र शुभदायकः ॥
राधाराधयितो राधी राधाचित्तप्रमोदकः ॥१५॥

राधारतिसुखोपेतो११० राधामोहनतत्परः ।।
राधावशीकरो राधाहृदयाम्भोजषट्पदः ।।१६।।
राधालिङ्गनसंमोहो राधानर्तनकौतुकः ।।
राधासञ्जातसम्प्रीती राधाकामफलप्रदः ।।१७।।
वृन्दापतिः कोशनिधिः कोकशोकविनाशकः१२०।।
चन्द्रापतिश्चन्द्रपतिश्चण्डकोदण्डभञ्जनः ।।१८।।
रामो दाशरथी रामो भृगुवंशसमुद्भवः ।।
आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जनः।।१९।।

वृषभानु१३०र्भवो भावः काश्यपिः करुणानिधिः ॥
कोलाहलो हली हाली हेली हलधरप्रियः ॥२०॥
राधामुखाब्जमार्तण्डो१४० भास्करो रविजो विधुः ॥
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥२१॥
रोहिणीहृदयानन्दी वसुदेवात्मजो१५० बली ॥
नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः ॥२२॥
नागो नवाम्भो विरुदो वीरहा वरदो बली१६०॥
गोपथो विजयी विद्वान् शिपिविष्टः सनातनः ॥२३॥

पर्शुरामवचोग्राही वरग्राही शृगालहा ॥
दमघोषोपदेष्टा च रथग्राही१७० सुदर्शनः ॥२४॥
वीरपत्नीयशस्त्राता जराव्याधिविघातकः ॥
द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः ॥२५॥
यमुनावेगसंहारी नीलाम्बरधरः प्रभुः ॥
विभुःशरासनो१८० धन्वी गणेशो गणनायकाः ॥२६॥
लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ॥
वामनो वामनी भूतो वमनो१९० वमनारुहः ॥२७॥

यशोदानन्दनः कर्त्ता यमलार्जुनमुक्तिदः ॥
उलूखली महामानी दामबद्धाह्वयी शमी ॥२८॥
भक्तानुकारी भगवान्२०० केशवोऽचलधारकः ॥
केशिहा मधुहा मोही वृषासुरविघातकः ॥२९॥
अघासुरविनाशी च पूतनामोक्षदायकः ॥
कुब्जाविनोदी भगवान्२१० कंसमृत्युर्महामखी ॥३०॥
अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ॥
कन्दर्पकोटि-लावण्यश्चन्द्रकोटिसुशीतलः ॥३१॥

रविकोटिप्रतीकाशो वायुकोटिमहाबलः२२० ॥
ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः॥३२॥
कमली कमलाक्षश्च कमलामुखलोलुपः ॥
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥३३॥
सौभाग्याधिकचित्तो२३०ऽयं महामायी महोत्कटः॥
तारकारिः सुरत्राता मारीचक्षोभकारकः ॥३४॥
विश्वामित्रप्रियो दान्तो रामो राजीवलोचनः ॥
लंकाधिपकुलध्वंसी२४० विभीषणवरप्रदः॥३५॥

सीतानन्दकरो रामो वीरो वारिधिबन्धनः ॥
खरदूषणसंहारी साकेतपुरवासनः ॥३६॥
चन्द्रावलीपतिः कूलः केशीः२५० कंसवधोऽमरः ॥
माधवो मधुहा माध्वी माध्वीको माधवो मधुः॥३७॥
मुञ्जाटवीगाहमानोधेनुकारि२६० धरात्मजः ॥
वंशीवटविहारी च गोवर्धनवनाश्रयः ॥३८॥
तथा तालवनोद्देशी भाण्डीरवनशंखहा ॥
तृणावर्तकथाकारी वृषभानुसुतापतिः ॥३९॥

राधाप्राणसमो राधावदनाब्जमधुव्रतः२७० ॥
गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ॥४०॥
क्रीडाकमलसंदोहो गोपिकाप्रीतिरञ्जनः ॥
रञ्जको रञ्जनो रङ्गो रङ्गी रङ्गमही रुहः ॥४१॥
कामः२८० कामारि भक्तोऽयं पुराणपुरुषः कविः ॥
नारदो देवलो भीमो बालो बालमुखाम्बुजः ॥४२॥
अम्बुजो ब्रह्मसाक्षी२९० च योगी दत्तवरो मुनिः ॥
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥४३॥

पद्मनाभःसुरज्येष्ठो ब्रह्मा३०० रुद्रोऽहिषितःभूषितः ॥
गणानां त्राणकर्त्ता च गणेशो ग्रहिलो ग्रही ॥४४॥
गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः ॥
यादवेन्द्रो३१० द्वारकेन्द्रो मथुरावल्लभो धुरी ॥४५॥
भ्रमरः कुन्तली कुन्तीसुतरक्षी महामखी ॥
यमुनावरदाता च कश्यपस्य वरप्रदः ॥४६॥
शङ्खचूडवधोद्दामो३२० गोपीरक्षणतत्परः ॥
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः ॥४७॥

फाल्गुनः फाल्गुनसखो विराधवधकारकः ॥
रुक्मिणीप्राणनाथश्च३३० सत्यभामा प्रियंकरः ॥४८॥
कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः ॥
अङ्कुशो भूसरो भामो भामको भ्रामको३४० हरिः ॥४९॥
सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ॥
प्रद्युम्नो बलकर्त्ता च प्रहर्त्ता दैत्यहा३५० प्रभुः ॥५०॥
महाधनो महावीरो वनमालाविभूषणः ॥
तुलसीदामशोभाढ्यो जालन्धरविनाशनः ॥५१॥

शूरः सूर्योऽमृताण्डश्च भास्करो३६० विश्वपूजितः ॥
रविस्तमोहा वह्निश्च वाडवो वडवानलः ॥५२॥
दैत्यदर्पविनाशी च गरुडो गरुडाग्रजः ॥
गोपीनाथो३७० महीनाथो वृन्दानाथोऽवरोधकः ॥५३॥
प्रपञ्ची पञ्चरूपश्च लतागुल्मश्च गोपितः ॥
गङ्गा च यमुनारूपो३८० गोदा वेत्रवती तथा ॥५४॥
कावेरी नर्मदा तापी गण्डकी सरयूस्तथा ॥
राजसस्तामसः सत्त्वी३९० सर्वाङ्गी सर्वलोचनः ॥५५॥

सुधामयोऽमृतमयो योगिनीवल्लभः शिवः ॥
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः४००शचीपतिः॥५६॥
वंशी वंशधरो लोको विलोको मोहनाशनः ॥
रवरावो रवो रावो बालो४१० बालबलाहकः ॥५७॥
शिवो रुद्रो नलो नीलो लाङ्गली लाङ्गलाश्रयः ॥
पारदः पावनो हंसो४२० हंसारूढोजगत्पतिः ॥५८॥
मोहिनीमोहनो मायी महामायो महामखी ॥
वृषो वृषाकपिःकालःकालीदमनकारकः४३० ॥५९॥

कुब्जाभाग्यप्रदो वीरो रजकक्षयकारकः ॥
कोमलो वारुणो राजा जलजो जलधारकः ॥६०॥
हारकः सर्वपापघ्नः४४० परमेष्ठी पितामहः ॥
खड्गधारी कृपाकारी राधारमण सुन्दरः ॥६१॥
द्वादशारण्यसम्भोगी शेषनागफणालयः ॥
कामःश्यामसुखः४५०श्रीदःश्रीपतिःश्रीनिधिःकृतिः॥६२॥
हरिर्हरो नरो नारो नरोत्तम इषुप्रियः४६०॥
गोपालीचित्तहर्ता च कर्ता संसारतारकः ॥६३॥

आदिदेवो महादेवो गौरीगुरुरनाश्रयः ॥
साधुर्मधुर्विधु४७०र्धाता त्राताऽक्रूरपरायणः ॥६४॥
रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः ॥
वनं वनी वनाध्यक्षो४८०महावन्द्यो महामुनिः ॥६५॥
स्यमन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः ॥
गोवर्द्धनो वर्द्धनीयो वर्द्धनी वर्द्धनप्रियः ॥६६॥
वर्द्धन्यो वर्द्धनो४९० वर्द्धी वर्द्धिष्णुः सुमुखप्रियः ॥
वर्द्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥६७॥

गोपालरमणी भर्ता साम्बकुष्ठविनाशकः ॥
रुक्मिणीहरणः५००प्रेम प्रेमी चन्द्रावलीपतिः ॥६८॥
श्रीकर्ता विश्वभर्त्ता च नरो नारायणो बली ॥
गणो गणपतिश्चैव दत्तात्रेयो५१० महामुनिः ॥६९॥
व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ॥
स्वःश्रेयसं शिवं भद्रं भावुकं५२० भविकं शुभम् ॥७०॥
शमात्मकः शुभः शास्ता प्रशास्ता मेघनादहा ॥
ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥७१॥

कृष्णः कमलपत्राक्षः५३० कृष्णः कमललोचनः ॥
कृष्णः कामी सदा कृष्णः समस्तप्रियकारकः ॥७२॥
नन्दो नन्दी महानन्दी मादी मादनकः किली५४० ॥
मिली हिली गिली गोली गोलो गोलालयो गुली ॥७३॥
गुग्गुली मारकी शाखी५५० वटः पिप्पलकः कृती ॥
म्लेच्छहा कालहर्त्ता च यशोदायश एव च ॥७४॥
अच्युतः केशवो विष्णुर्हरिः५६० सत्यो जनार्दनः ॥
हंसो नारायणो लीलो नीलो भक्तिपरायणः ॥७५॥

जानकीवल्लभो रामो विरामो विघ्ननाशनः५७० ॥
सहस्रांशुर्महाभानुर्वीरबाहुर्महोदधिः ॥७६॥
समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ॥
गोकुलानन्दकारी च५८० प्रतिज्ञापरिपालकः ॥७७॥
सदारामः कृपारामो महारामो धनुर्धरः ॥
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः५९० ॥७८॥
कम्बलाश्वतरो रामो रामायणप्रवर्तकः ॥
द्यौर्दिवो दिवसो दिव्यो भव्यो भविभयापहः ॥७९॥

पार्वतीभाग्यसहितो भ्राता६०० लक्ष्मी विलासवान् ॥
विलासी साहसी सर्वी गर्वी गर्वितलोचनः ॥८०॥
मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः६१० ॥
यमो यमादिर्यमनो यामी यामविधायकः ॥८१॥
वंसुली पांसुली पासुः पाण्डुरर्जुनवल्लभः६२० ॥
ललिताचन्द्रिकामाली माली मालांबुजाश्रयः ॥८२॥
अम्बुजाक्षो महायक्षो दक्षश्चिन्तामणिः प्रभुः ॥
मणिर्दिनमणिश्चैव केदारो६३० बदराश्रयः ॥८३॥

बदरीवनसम्प्रीतो व्यासः सत्यवतीसुतः ॥
अमरारिनिहन्ता च सुधा सिन्धुर्विधूदयः ॥८४॥
चन्द्रो रविः शिवः शूली६४० चक्री चैव गदाधरः ॥
श्रीकर्त्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥८५॥
श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः६५० ॥
वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः ॥८६॥
नारायणः परंधाम देवदेवो महेश्वरः ॥
चक्रपाणिः कलापूर्णो६६० वेदवेद्यो दयानिधिः ॥८७॥

भगवान्सर्वभूतेशो गोपालः सर्वपालकः ॥
अनन्तो निर्गुणोऽनंतो निर्विकल्पो६७० निरंजनः ॥८८॥
निराधारो निराकारो निराभासो निराश्रयः ॥
पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः ॥८९॥
क्षणावनिः६८० सार्वभौमो वैकुण्ठो भक्तवत्सलः॥
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः ॥९०॥
देवकीगर्भसम्भूतो यशोदावत्सलो६९० हरिः ॥
शिवः संकर्षणः शम्भुर्भूतनाथो दिवस्पतिः ॥९१॥

अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः७०० ॥
निर्वाणनायको नित्यो नीलजीमूतसन्निभः ॥९२॥
कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः ॥
हृषीकेशः पीतवासो वसुदेवप्रियात्मजः ॥९३॥
नन्दगोपकुमारार्यो७१० नवनीताशनः प्रभुः ॥
पुराणपुरुषः श्रेष्ठः शस्त्रपाणिः सुविक्रमः ॥९४॥
अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः७२० ॥
गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥९५॥

वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः ॥
तृणावर्तान्तको भीमो साहसो बहुविक्रमः७३०॥९६॥
शकटासुरसंहारी बकासुरविनाशनः ॥
धेनुकासुरसंहारी पूतनारिर्नृकेशरी ॥९७॥
पितामहो गुरुः साक्षात्प्रत्यगात्मा सदाशिवः७४०॥
अप्रमेयप्रभः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्द्धनः ॥९८॥
धन्यो मान्यो भवो भावो धीरःशान्तो७५० जगद्गुरुः ॥
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवता गुरुः ॥९९॥

क्षीराब्धिशयनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रज:७६० ॥
धात्रीपतिरमेयात्मा चंद्रशेखरपूजित: ॥१००॥
लोकसाक्षी जगच्चक्षु: पुण्यचारित्रकीर्तन: ॥
कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रह: ॥१०१॥
मन्दस्मिताननो गोपो७७० गोपिकापरिवेष्टित: ॥
फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदन: ॥१०२॥
इन्दीवरदलश्यामो बर्हिबर्हावतंसक: ॥
मुरलीनिनदाह्लादो दिव्यमाल्याम्बराश्रय: ॥१०३॥

सुकपोलयुगः सुभ्रूयुगलः७८० सुललाटकः ॥
कम्बुग्रीवो विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः॥१०४॥
पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः ॥
कलङ्करहितः७९० शुद्धो दुष्टशत्रुनिबर्हणः ॥१०५॥
किरीटकुण्डलधरः कटकाङ्गदमण्डितः ॥
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः ॥१०६॥
मञ्जीररञ्जितपदः सर्वाभरणभूषितः ॥
विन्यस्तपादयुगलो दिव्यमङ्गलविग्रहः८०० ॥१०७॥

गोपिकानयनानन्दः पूर्णचंद्रनिभाननः ॥
समस्तजगदानन्दः सुन्दरो लोकनंदनः ॥१०८॥
यमुनातीरसञ्चारी राधामन्मथवैभवः ॥
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः८१० ॥१०९॥
शृङ्गारमूर्तिः श्रीधामातारको मूलकारणम् ॥
सृष्टिसंरक्षणोपायः क्रूरासुरविभञ्जनः ॥११०॥
नरकासुरहारी च मुरारिर्वैरिमर्दनः ॥
आदितेयप्रियो८२० दैत्यभीकरश्चेन्दुशेखरः ॥१११॥

जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः ॥
पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः ॥११२॥
रुक्मिणीरमणः८३० सत्यभामाजाम्बवतीप्रियः ॥
मित्रविन्दानाग्नजिती -लक्ष्मणासमुपासितः॥११३॥
सुधाकरकुले जातोऽनन्तप्रबलविक्रिमः ॥
सर्वसौभाग्यसम्पन्नो द्वारकायामुपस्थितः ॥११४॥
भद्रासूर्यसुतानाथो८४० लीलामानुषविग्रहः ॥
सहस्रषोडशस्त्रीशो भोगमोक्षैकदायकः ॥११५॥

वेदान्तवेद्यः संवेद्यो वैद्यो ब्रह्मांडनायकः ॥
गोवर्द्धनधरो नाथः सर्वजीवदयापरः८५० ॥११६॥
मूर्तिमान्सर्वभूतात्मा आर्तत्राणपरायण ॥
सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ॥११७॥
षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः ॥
महानुभावः८६० कैवल्यदायको लोकनायकः ॥११८॥
आदिमध्यान्तरहितः शुद्धसात्विकविग्रहः ॥
असमानः समस्तात्मा शरणागतवत्सलः ॥११९॥

उत्पत्तिस्थितिसंहारकारणं सर्वकारणम् ।।
गम्भीरः सर्वभावज्ञः८७० सच्चिदानन्दः विग्रहः ।।१२०।।
विष्वक्सेनः सत्यसन्धः सत्यवान्संत्यविक्रमः ।।
सत्यव्रतः सत्यसंज्ञः सर्वधर्मपरायणः ।।१२१।।
आपन्नार्त्तिप्रशमनो द्रौपदीमानरक्षकः८८० ।।
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः ।।१२२।।
भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः ।।
दमघोषसुतद्वेषी बाणबाहुविखण्डनः ।।१२३।।

भीष्मभक्तिप्रदो दिव्यः८९० कौरवान्वयनाशनः ॥
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथिः ॥१२४॥
नारसिंहो महावीरः स्तम्भजातो महाबलः ॥
प्रह्लादवरदः सत्यो देवपूज्यो९००ऽभयङ्करः ॥१२५॥
उपेन्द्रइन्द्रावरजो वामनो बलिबन्धनः ॥
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः ॥१२६॥
शेषपर्यङ्कशयनो वैनतेयरथो९१० जयी ॥
अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ॥१२७॥

योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ॥
योगिहृत्पंकजावासोयोगमायासमन्वितः१२०॥१२८॥
नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ॥
सुषुम्णामार्गसञ्चारी देहस्यान्तसंस्थितः ॥१२९॥
देहेन्द्रियमनःप्राणसाक्षी चेतः प्रसादकः ॥
सूक्ष्मःसर्वगतो देही ज्ञानदर्पणगोचरः१३० ॥१३०॥
तत्त्वत्रयात्मकोऽव्यक्तः कुण्डलीसमुपाश्रितः ॥
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ॥१३१॥

श्रीनिवासः१४० सदानन्दो विश्वमूर्तिर्महाप्रभुः ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥१३२॥
समस्तभुवनाधारः समस्तप्राणरक्षकः ॥
समस्तसर्वभावज्ञो१५० गोपिकाप्राणवल्लभः ॥१३३॥
नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमङ्गलः ॥
व्यूहार्चितो जगन्नाथः श्रीवैकण्ठपुराधिपः ॥१३४॥
पूर्णानन्दघनीभूतो गोपवेषधरो१६० हरिः ॥
कलापकुसुमश्यामः कोमलः शान्तविग्रहः ॥१३५॥

गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः ॥
वेणुवादरतः श्रेष्ठो देवानां हितकारकः१७० ॥१३६॥
बालक्रीडासमासक्तो नवनीतस्य तस्करः ॥
गोपालकामिनीजारश्चोरजार-शिखामणिः ॥१३७॥
परज्योतिः पराकाशः परावासः परिस्फुटः ॥
अष्टादशाक्षरो मन्त्रो१८०व्यापको लोकपावनः॥१३८॥
सप्तकोटिमहामन्त्रशेखरो देवशेखरः ॥
विज्ञानज्ञानसन्धानस्तेजोराशिर्जगत्पतिः ॥१३९॥

भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः९९० ॥
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ॥१४०॥
भक्ताधीनमनाः पूज्यो भक्तलोकशिवंकरः ॥
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः ॥१४१॥
अपारकरुणासिन्धुर्भगवान् भक्ततत्परः१०००॥१४२॥
इति श्रीराधिकानाथनामसाहस्रकीर्तनम् ॥
स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ॥१॥

वैष्णवानां प्रियकरं महारोगनिवारणम् ॥
ब्रह्महत्यासुरापानं परस्त्रीगमनं तथा ॥२॥
परद्रव्यापरहरणं परद्वेषसमन्वितम् ॥
मानसं वाचिकं कायं यत्पापं पापसंभवम् ॥३॥
सहस्रनामपठनात्सर्वं नश्यति तत्क्षणात् ॥
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान्॥४॥
कार्तिक्यां संपठेद्रात्रौ शतमष्टोत्तरं क्रमात् ॥
पीताम्बरधरो धीमान्सुगन्धिपुष्पचन्दनैः ॥५॥

पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च ॥
राधाध्यानाङ्कितो धीरो वनमालाविभूषितः ॥६॥
शतमष्टोत्तरं देवि पठेन्नामसहस्रकम् ॥
चैत्रशुक्ले च कृष्णे च कुहू संक्रान्तिवासरे ॥७॥
पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत्क्षणात् ॥
तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ॥८॥
रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ॥
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः ॥९॥

पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते ॥
महानिशायां सततं वैष्णवो यः पठेत्सदा ॥१०॥
देशान्तरगता लक्ष्मीः समायाति न संशयः ॥
त्रैलोक्ये च महादेवि सुन्दर्यः काममोहिताः ॥११॥
मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः ॥
रोगीरोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥१२॥
गुर्विणी जनयेत्पुत्रं कन्याविन्दति सत्पतिम् ॥
राजानो वश्यतां यांति किं पुनः क्षुद्रमानवाः ॥१३॥

सहस्रनामश्रवणात्पठनात्पूजनात्प्रिये ॥
धारणात्सर्वमाप्नोति वैष्णवो नात्र संशयः ॥१४॥
वंशीवटे चान्यवटे तथापिप्पलकेऽथवा ॥
कदम्बपादपतले गोपालमूर्तिसन्निधौ ॥१५॥
यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम् ॥
कृष्णेनोक्तं राधिकायै मयि प्रोक्तं पुरा शिवे ॥१६॥
नारदाय मया प्रोक्तं नारदेन प्रकाशितम् ॥
मया त्वयि वरारोहे प्रोक्तमेतत्सुदुर्लभम् ॥१७॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कथंचन ॥
शठाय पापिने चैव लम्पटाय विशेषतः ॥१८॥
न दातव्यं न दातव्यं न दातव्यं कदाचन ॥
देयं शिष्याय शान्ताय विष्णुभक्तिरताय च ॥१९॥
गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च ॥
अश्वमेधसहस्रस्य फलं पाठे भवेद्ध्रुवम् ॥२०॥
मोहनं स्तम्भनं चैव मारणोच्चाटनादिकम् ॥
यद्यद्वाञ्छति चित्तेन तत्तत्प्राप्नोति वैष्णवः ॥२१॥

एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ॥
आहारं ब्राह्मणं दत्त्वा दक्षिणां स्वर्णभूषणम् ॥२२॥
तत आरम्भकर्ताऽस्य सर्वं प्राप्नोति मानवः ॥
शतावृत्तं सहस्रं च यः पठेद्वैष्णवो जनः ॥२३॥
श्रीवृन्दावनचन्द्रस्य प्रसादात्सर्वमाप्नुयात् ॥
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति ॥२४॥
न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ॥
सर्पादिभूतयक्षाद्या नश्यन्ति नात्र संशयः ॥२५॥

श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ॥
गृहे यत्र सहस्रं च नाम्नां तिष्ठति पूजितम् ॥२६॥

इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे
श्रीगोपालसहस्रनामस्तोत्रं सम्पूर्णम् ॥

उपोद्धातश्लोकाः २३, मूलसहस्रनामश्लोकाः १४१,
फलश्रुतिश्लोकाः २६, एवं श्लोकसंख्या १९०॥

श्रीगणेशाय नमः

अथ राधाऽष्टोत्तरशतनाम प्रारम्भः

अथास्याः संप्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ॥
यस्य संकीर्तनादेव श्रीकृष्णं वशयेद्ध्रुवम् ॥१॥
राधिका सुन्दरी गोपा कृष्णसंगमकारिणी ॥
चञ्चलाक्षी कुरङ्गाक्षी गान्धर्वी वृषभानुजा ॥२॥
वीणापाणिः स्मितमुखी१० रक्ताशोकलतालया ॥
गोवर्धनचरी गोपी गोपीवेषमनोहरा ॥३॥

चन्द्रावली सपत्नी च दर्पणास्या कलावती ॥
कृपावती सुप्रतीका तरुणी२० हृदयङ्गमी ॥४॥
कृष्णप्रिया कृष्णसखी विपरीतरतिप्रिया ॥
प्रवीणासुरतप्रीता चन्द्रास्या चारुविग्रहा ॥५॥
केकराक्षी हरेः कान्ता३० महालक्ष्मी सुकेलिनी ॥
संकेतवटसंस्थाना कमनीया च कामिनी ॥६॥
वृषभानुसुता राधा किशोरी ललिता लता ॥
विद्युद्वल्ली४० कञ्चनाभा कुमारी मुग्धवेशिनी ॥७॥

केशिनी केशवसखी नवनीतैकविक्रया ॥
षोडशाब्दा कलापूर्णा जारिणी जारसङ्गिनी५० ॥८॥
हर्षिणी वर्षिणी वीरा धीरा धारा धरा धृतिः ॥
यौवनस्था वनस्था च मधुरा मधुराकृतिः६० ॥९॥
वृषभानुपुरावासा मानलीलाविशारदा ॥
दानलीला दानपात्री दण्डहस्ता भ्रुवोन्नता ॥१०॥
सुस्तनी मधुरास्या च विम्बोष्ठी पञ्चमस्वरा७० ॥
सङ्गीतकुशला सेव्या कृष्णवश्यत्वकारिणी ॥११॥

तारिणी हारिणी ह्रीला शीला लीला ललामिका ॥
गोपाली८० दधिविक्रेत्री प्रौढा मुग्धा च मध्यका ॥१२॥
स्वाधीनपतिका चोक्ता खण्डितायाभिसारिका ॥
रसिका रासना रस्या९० रसशास्त्रैकशेवधिः ॥१३॥
पालिका लालिका लज्जा लालसा ललनामणिः ॥
बहुरूपा सुरूपा च सुप्रसन्ना महामतिः१०० ॥१४॥
मरालगमना मत्ता मन्त्रिणी मन्त्रनायिका ॥
मन्त्रराजैकसंसेव्या मन्त्रराजैकसिद्धिदा ॥१५॥

अष्टादशाक्षरफला अष्टाक्षरनिषेविता११८ ॥
इत्येतद्राधिकादेव्या नाम्नामष्टोत्तरं शतम् ॥१६॥
कीर्तयेत्प्रातरुत्थाय कृष्णवश्यत्वसिद्धये ॥
एकैकनामोच्चारेण वशी भवति केशवः ॥१७॥
वदने चैव कण्ठे च वाह्वोरुरसि चोदरे ॥
पादयोश्च क्रमेणास्या न्यसेन्मन्त्रान्पृथक् पृथक् ॥१८॥
ॐ तत्सत् इत्यूर्ध्वाम्नाये राधिकाष्टोत्तरशतनाम कथनं नाम प्रथमः पटलः ॥ अथ श्रीराधामहामन्त्रः ॥

क्लीं श्रीं राधिकायै स्वाहा ॥ अस्य श्रीराधिकामन्त्रस्य अगस्त ऋषिः ॥ जगती छन्दः ॥ श्रीराधिका परमेश्वरी देवता ॥ क्लीं बीजं स्वाहा शक्तिः क्लीं श्रीं कीलकं श्रीकृष्णवश्यार्थे जपे विनियोगः ॥ अगस्त्यऋषये नमः शिरसि ॥ जगतीछन्दसे नमः मुखे ॥ राधिकादेवतायै नमः हृदये ॥ क्लीं बीजाय नमः गुह्ये ॥ क्लीं स्वाहा शक्तये नमः पादयोः ॥ क्लीं श्रीं कालिकायै नमः सर्वाङ्गेषु ॥ श्रीं अंगुष्ठाभ्यां नमः॥

क्लीं तर्जनीभ्यां नमः।। राधिकायै स्वाहा मध्यमाभ्यां नमः ।। क्लीं अनामिकाभ्यां नमः श्रीं कनिष्ठिकाभ्यां नमः ।। राधिकायै स्वाहा करतलकरपृष्ठाभ्यां नमः ।। क्लीं हृदयाय नमः ।। श्रीं शिरसे स्वाहा ।। राधिकायै स्वाहा शिखायै वषट् श्रीं कवचाय हुम् ।। श्रीं नेत्रात्रयाय वौषट् ।। राधिकायै स्वाहा अस्त्राय फट् ध्यात्वा जपेत् ।। लक्षमात्रं पुरश्चरणं कलौ चतुर्लक्षं जपित्वा कुशली भवेत् ।।

इति राधामहामन्त्रः

अथ महालक्ष्म्यष्टकम्

इन्द्र उवाच

॥ श्रीगणेशाय नमः॥

नमस्तेऽस्तुमहामाये श्रीपीठे सुरपूजिते ॥
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तुते ॥१॥
नमस्ते गरुडारूढे कोलासुरभयंकरि ॥
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तुते ॥२॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि ॥
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तुते ॥३॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनी ॥
मन्त्रमूर्त्ते सदा देवि महालक्ष्मि नमोऽस्तुते ॥४॥
आद्यन्तरहिते देवि आद्यशक्ते महेश्वरि ॥
योगजे योगसंभूते महालक्ष्मि नमोस्तुते ॥५॥
स्थूले सूक्ष्मे महारौद्रे महाशक्ते मनोहरे ॥
महापापहरे देवि महालक्ष्मि नमोऽस्तुते ॥६॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ॥
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तुते ॥७॥

श्वेताम्बरधरे देवि नानालङ्कारभूषणे ॥
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तुते ॥८॥
महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः ॥
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥
एककालं पठेन्नित्यं महापापविनाशनम् ॥
द्विकालं च पठेन्नित्यं धनधान्यसमन्वितः ॥१०॥
त्रकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ॥
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

इतीन्द्रकृतो महालक्ष्म्यष्टकस्तवः सम्पूर्णः

अथ गोपालस्तवराजस्तोत्रम्

ॐ अस्य श्रीगोपालमन्त्रस्य नारदऋषिः ॥
अनुष्टुप्छन्दः ॥ श्रीकृष्णः परमात्मा देवता ॥
श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥

सजलजलदनीलं दर्शितोदारशीलं,
करतलधृतशैलं वेणुवाद्ये रसालम् ॥

व्रजजनकुलपालं कामिनीकेलिलोलं,
तरुणतुलसिमालं नौमि गोपालबालम् ॥१॥

नारद उवाच

नवीननीरदश्यामं नीलेन्दीवरलोचनम् ॥
बल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम् ॥२॥
स्फुरद्बर्हदलोद्बद्धनीलकुञ्चितमूर्धजम् ॥
कदम्बकुसुमोद्धासिवनमालाविभूषितम् ॥३॥
गण्डमण्डलसंसर्गिचलत्काञ्चनकुण्डलम् ॥
स्थूलमुक्ताफलोदारहारोद्द्योतितवक्षसम् ॥४॥

हेमांगदतुलाकोटिकिरीटोज्ज्वलविग्रहम् ॥
मन्दमारुतसंक्षोभि वलिताम्बरसंचयम् ॥५॥
रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः ॥
लसद्गोपालिकाचेतोमोहयन्तं मुहुर्मुहुः ॥६॥
बल्लवीवदनाम्भोजमधुपानमधुव्रतम् ॥
क्षोभयन्तं मनस्तासां सस्मेरापाङ्गवीक्षणैः ॥७॥
यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परम् ॥
विचित्राम्बरभूषाभिर्गोपनारीभिरावृतम् ॥८॥

प्रभिन्नाञ्जनकालिन्दी-जलकेलिकलोत्सुकम्।।
योधयन्तं क्वचिद्गोपान्व्याहरन्तं गवां गणम् ।।९।।
कालिन्दीजलसंसर्गिशीतलानिलकम्पिते ।।
कदम्बपादपच्छाये स्थितं वृन्दावने क्वचित् ।।१०।।
रत्नभूधरसंलग्नरत्नासनपरिग्रहम् ।।
कल्पपादपमध्यस्थं हेममण्डपिकागतम् ।।११।।
वसन्तकुसुमामोदसुरभीकृतदिङ्मुखे ।।
गोवर्धनगिरौ रम्ये स्थितं रासरसोत्सुकम् ।।१२।।

सव्यहस्ततलन्यस्तगिरिवर्यात पत्रकम् ।।
खण्डिताखण्डलोन्मुक्तमुक्तासारघनाघनम् ।।१३।।
वेणुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः ।।
सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिवीक्षितम् ।।१४।।
कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः ।।
दण्डपाशोद्यतकरैर्गोपालैरुपशोभितम् ।।१५।।
नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदाङ्गपारगैः ।।
प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्परम् ।।१६।।

य एवं चिन्तयेद्देवं भक्त्या यः स्तौति मानवः ॥
त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ॥१७॥
राजवल्लभतामेति भवेत्सर्वजनप्रियः ॥
अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥१८॥

इति श्रीगौतमीयतन्त्रे गोपालचूड़ामणि स्तवराजः संपूर्णः

श्रीगणेशाय नमः

अथ लक्ष्मीस्तोत्र प्रारम्भः

जय पद्मपलाशाक्षि जय त्वं श्रीपतिप्रिये ॥
जय मातर्महालक्ष्मि संसारार्णवतारिणि ॥१॥
महालक्ष्मिनमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ॥
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥२॥
पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे ॥
सर्वभूतहितार्थाय वसुवृष्टिं सदा कुरु ॥३॥

जगन्मातर्नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥
दयावति नमस्तुभ्यं विश्वेश्वरि नमोऽस्तु ते ॥४॥
नमः क्षीरार्णवसुते नमस्त्रैलोक्यधारिणि ॥
वसुवृष्टे नमस्तुभ्यं रक्ष मां शरणागतम् ॥५॥
रक्ष त्वं देवदेवेशि देवदेवस्यवल्लभे ॥
दारिद्र्यात्त्राहि मां लक्ष्मि कृपां कुरु ममोपरि ॥६॥
नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि ॥
ब्रह्मादयो नमन्ति त्वां जगदानन्ददायिनि ॥७॥

विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ॥
आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा ॥८॥
अब्जवासे नमस्तुभ्यं चपलायै नमो नमः ॥
चञ्चलायै नमस्तुभ्यं ललितायै नमो नमः ॥९॥
नमः प्रद्युम्नजननि मातस्तुभ्यं नमो नमः ॥
परिपालय मां मातर्देवि त्वं शरणागतम् ॥१०॥
शरण्ये त्वां प्रपन्नोऽस्मि कमले कमलालये ॥
त्राहि त्राहि महालक्ष्मि परित्राणपरायणे ॥११॥

पाण्डित्यं शोभते नैव न शोभन्ते गुणाः नरे ॥
शीलत्वं नैव शोभेत महालक्ष्मि त्वया विना ॥१२॥
तावद्विराजते रूपं तावच्छीलं विराजते ॥
तावद्गुणा नराणां च यावल्लक्ष्मीः प्रसीदति ॥१३॥
लक्ष्मि त्वयाऽलंकृतमानवा: ये, पापैर्विमुक्ता
नृपलोकमान्याः ॥ गुणैर्विहीना गुणिनो
भवन्ति दुःशीलिनः शीलवतां वरिष्ठाः ॥१४॥
लक्ष्मीर्भूषयते रूपं लक्ष्मीर्भूषयते कुलम् ॥

लक्ष्मीर्भूषयते विद्या सर्वाल्लक्ष्मीर्विशिष्यते ॥१५॥
लक्ष्मित्वद्गुणकीर्तनेन सकला भूर्यात्यलं जिह्मतां ,
रुद्राद्या रविचन्द्रदेवपतयो वक्तुं च नैव क्षमाः ।
अस्माभिस्तव रूपलक्षणगुणान् वक्तुं कथं शक्यते ,
मातर्मां परिपाहि विश्वजनके कृत्वा ममेष्टं ध्रुवम्॥१६॥
दीनातिभीतं भवतापपीडितं, धनैर्विहीनं तव
पार्श्वमागतम् ॥ कृपानिधित्वान्मम लक्ष्मि
सत्वरं, धनप्रदानाद्धननायकं कुरु ॥१७॥

मां विलोक्यजननी हरिप्रिये निर्धनं तव
समीपमागतम् ॥ देहि मे झटिति लक्ष्मि
कराग्रं वस्त्रकाञ्चनवरान्नमद्भुतम् ॥१८॥
त्वमेव जननी लक्ष्मि पिता लक्ष्मि त्वमेव च ॥
भ्राता त्वं च सखा लक्ष्मि विद्या लक्ष्मि त्वमेव च ॥१९॥
त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि ॥
त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि ॥
त्राहि त्राहि जगन्मातर्दारिद्र्यात्त्राहि वेगतः ॥२०॥

नमस्तुभ्यं जगद्धात्रि नमस्तुभ्यं नमो नमः ॥
धर्माधारे नमस्तुभ्यं नमः संपत्तिदायिनि ॥२१॥
दारिद्र्यार्णवमग्नोऽहं विमग्नोऽहं रसातले ॥
मज्जन्तं मां करे धृत्वा तूद्धर त्वं रमे द्रुतम् ॥२२॥
किं लक्ष्मि बहुनोक्तेन जल्पितेन पुनः पुनः ॥
अन्यत्मे शरणं नास्ति सत्यं सत्यं हरिप्रिये ॥२३॥
एतच्छ्रुत्वाऽगस्तिवाक्यं हृष्यमाणा हरिप्रिया ॥
उवाच मधुरां वाणीं तुष्टाऽहं तव सर्वदा ॥२४॥

लक्ष्मीरुवाच

यत्त्वयोक्तमिदं स्तोत्रं यः पठिष्यति मानवः ॥
शृणोति च महाभागस्तस्याहं वशवर्तिनी ॥२५॥
नित्यं पठति यो भक्त्या त्वलक्ष्मीस्तस्य नश्यति ॥
ऋणं च नश्यते तीव्रं वियोगं नैव पश्यति ॥२६॥
यः पठेत्प्रातरुत्थाय श्रद्धाभक्तिसमन्वितः ॥
गृहे तस्य सदा तुष्टा नित्यं श्रीः पतिनासह ॥२७॥
सुखसौभाग्यसंपन्नो मनस्वी बुद्धिमान् भवेत् ॥
पुत्रवान् गुणवान् श्रेष्ठो भोगभोक्ता च मानवः ॥२८॥

इदं स्तोत्रं महापुण्यं लक्ष्म्याऽगस्तिप्रकीर्तितम् ॥
विष्णुप्रसादजननं चतुर्वर्गफलप्रदम् ॥२९॥
राजद्वारे जयश्चैव शत्रोश्चैव पराजयः ॥
भूतप्रेतपिशाचानां व्याघ्राणां न भयं तथा ॥३०॥
न शस्त्रानलतोयौघाद्भयं तस्य प्रजायते ॥
दुर्वृत्तानां च पापानां बहुहानिकरं परम् ॥३१॥
मन्दुरा करिशालासु गवां गोष्ठे समाहितः ॥
पठेत्तद्दोषशान्त्यर्थं महापातकनाशनम् ॥३२॥

सर्वसौख्यकरं नृणामायुरारोग्यदं तथा ॥
अगस्तिमुनिना प्रोक्तं प्रजानां हितकाम्यया ॥३३॥

इत्यगस्तिविरचितं लक्ष्मीस्तोत्रं सम्पूर्णम्

श्रीगणेशाय नमः

अथ राधाकवचम्

पार्वत्युवाच

कैलासवासिन् भगवन् भक्तानुग्रहकारक ॥
राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥१॥
यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात्॥
त्वमेव शरणं नाथ शूलपाणे पिनाकधृक् ॥२॥

शिव उवाच

श्रृणुष्व गिरिजे तुभ्यं कवचं पूर्वसञ्चितम् ॥
सर्वरक्षाकरं पुण्यं सर्वहत्याहरं परम् ॥३॥
हरिभक्तिप्रदं साक्षाद्भुक्तिमुक्तिप्रसाधनम् ॥
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारकम् ॥४॥
सर्वत्र जयदं देवि सर्वशत्रुभयावहम् ॥
सर्वेषां चैव भूतानां मनोवृत्तिहरं परम् ॥५॥
चतुर्धा मुक्तिजनकं सदानन्दकरं परम् ॥
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥६॥

इदं कवचमज्ञात्वा राधा मन्त्रं च यो जपेत् ॥
स नाप्नोति फलं तस्य विघ्नस्तस्य पदे पदे ॥७॥
ऋषिरस्य महादेवोऽनुष्टुप् छन्दश्च कीर्तितः ॥
राधाऽस्य देवता प्रोक्ता रां बीजं कीलकं स्मृतम् ॥८॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥
श्री राधा मे शिरः पातु ललाटं राधिका तथा ॥९॥
श्रीमती नेत्रयुगलं कर्णौ गोपेन्द्रनन्दिनी ॥
हरिप्रिया नासिकां च भ्रूयुगं शशिशोभना ॥१०॥

ओष्ठं पातु कृपादेवी अधरं गोपिका तथा ॥
वृषभानुसुता दन्तांश्चिबुकं गोपनन्दिनी ॥११॥
चन्द्रावली पातु गण्डं जिह्वा कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ॥१२॥
बाहू द्वै चन्द्रवदना उदरं सुवलस्वसा ॥
कोटियोगान्विता पातु पादौ सौभद्रिका तथा॥१३॥
नखांश्चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा ॥
जानुदेशं जया पातु गोपी पादतलं तथा ॥१४॥

शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ॥
जानुदेशं जया पातु हरिणी पातु सर्वतः ॥१५॥
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ॥
पूर्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम्॥१६॥
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ॥
चन्द्रावली निशामेव दिवाक्ष्वेडित मेखला॥१७॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ॥
रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये॥१८॥

हेतुदा संगवे पातु केतुमाला दिवार्धके ॥
शेषाऽपराह्णसमये शमिता सर्वसन्धिषु ॥१९॥
योगिनी भोगसमये रतौ रतिप्रदा सदा ॥
कामेशी कौतुके नित्यं यागे रत्नावली मम ॥२०॥
सर्वदा सर्वकार्येषु राधिका कृष्णमानसा ॥
इत्येतत्कथितं देवि कवचं परमाद्भुतम् ॥२१॥
सर्वरक्षाकरं नाम महारक्षाकरं परम् ॥
प्रातर्मध्याह्नसमये सायाह्ने प्रपठेद्यदि ॥२२॥

सर्वार्थसिद्धिस्तस्य स्याद्यद्यन्मनसि वर्तते ॥
राजद्वारे सभायां च संग्रामे शत्रुसंकटे ॥२३॥
प्राणार्थनाशसमये यः पठेत्प्रयतो नरः ॥
तस्य सिद्धि र्भवेद्देवि न भयं विद्यते क्वचित् ॥२४॥
आराधिता राधिका च तेन सत्यं न संशयः ॥
गंगास्नानाद्धरेर्नामग्रहणाद्यत्पलं भवेत् ॥२५॥
तत्फलं तस्य भवति यः पठेत् प्रयतः शुचिः ॥
हरिद्रारोचना चन्द्रमंडितं हरिचन्दनम् ॥२६॥

कृत्वा लिखित्वा भूर्जं च धारयेन्मस्तके भुजे ॥
कण्ठे वा देवदेवेशि स हरिर्नात्र संशयः ॥२७॥
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः ॥
संहारं नियतं चाहं करोमि कुरुते तथा ॥२८॥
वैष्णवाय विशुद्धाय विरागगुणशालिने ॥
दद्यात्कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥२९॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे राधाकवचं सम्पूर्णम्

मुद्रक एवं प्रकाशक
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्री वेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४